RESEARCH REVIEW JOURNALS
Volume-04
Issue-03
March-2019

ISSN: 2455-3085 (Online)
RESEARCH REVIEW International Journal of Multidisciplinary
www.rrjournals.com[UGC Listed Journal]

# कविर्मनीषी परिभूः स्वयं भूः

डॉ0 मीनू सिंह

एम0ए0 (संस्कृत) एम0एड0, पी0एच0डी0, नेट इलाहाबाद

कविः क्रान्तदर्शी। यत्र यत्र क्रान्तदर्शित्वं तत्र तत्र कवित्वम्। क्रान्तदर्शित्वाद् व्यापकज्ञान वत्वकारणादेव यजुर्वेदे कवेः स्तुतिः कृता–कविर्मनीषी परिभूः स्वयंभूः। मुण्ऽकोपनिषदि सत्यदर्शिनः तत्त्वार्थ विदश्च कवयः कथ्यन्ते।

**तदेतत् सत्यं मन्त्रेषु कर्माणि कवयो**
**यान्यपश्यन्। तानि बहुधा सन्ततानि।।**
(मुण्डक–1–2–1)

अत्र 'ऋषयों मन्त्रद्रष्टारः' इत्यर्थमाश्रित्य ऋषयः कवयः उच्यन्ते। तैः तत्त्वदर्शिभिः मन्त्रेषु यानि कर्माणि दृष्टानि तानि एव वेदेषु सन्निहितानि। एवं संलक्ष्यते यत् तत्त्वार्थदर्शित्वम् ऋषित्वं कविभ्त्व⓪ परस्पर सम्बद्धमेव। यत्र दिव्यम् अलौकिकं प्रतिभा मूलकं कल्पनाजन्यं वा ज्ञानं संलक्ष्यते तत्र कवित्वं स्वीक्रियते। अतएव श्रीमहतोतेन कविलक्षणं निर्दिश्यते यत् तत्त्वदर्शनात् ऋषिः ऋषि एवं कविपदम् अलङ्कर्तुं प्रभवति। स एवं शास्त्रेषु कविरिरिति प्रथितः। कविशब्दः कवृ वर्णे धातोः सिध्यति। माधवीयधातुवृत्तौ शब्दार्थकत्वात् कुधातोः इ प्रत्यये कृते कविरिति शब्दः निष्पद्यते। तस्यैव कवेः कर्म काव्यमः। अनेन कविकाव्यशब्दयोः प्राघान्येन प्राथमिक दृष्ट्या च वर्णनेनैव सम्बन्धः सुस्पष्टम्। काव्यानन्दः ब्रह्मानन्द सहोदरः। काव्यरसमास्वाद्य नान्यत् किि֍चदपि रोचते जगति। काव्येषु आदर्शचरितानि कमनीय कथावस्तूनि च तथा वर्ण्यन्ते यथा तानि पाठं पाठं श्रावं श्रावं दर्शं दर्शं च चित्तं चमत्कृतमानन्दित֍च जायते। कवयः क्रान्तदर्शिनः यदुक्तं तत्वास्तविकम्। यत्र रविरश्मिः न प्रविशति तत्रापि गच्छति खलु काव्यदृष्टिः। स्वकीयसूक्ष्मेक्षिकया सम्यक् पर्यवेक्ष्य कवयों यल्लिखन्ति तत् सार्वभौमिकं सार्वदेशिकं सार्वकालिकं च सत्यंभवति।

**सकलकलासु श्रेष्ठा खलु काव्यकला।**
**यादृशं सौन्दर्यमाकर्षणं च कवितायां**

दरीदृश्यते तादृशं नान्यत्र दृष्टिपथमायाति। सर्वासामपि ललितकलानां कमनीयता काव्ये प्रौढतां चरमसीमानं च प्राप्ता। अतएव सुष्ठूक्तम्– ''कलासीमा काव्यम्'' काव्येषु स◌ीतनृत्याद्याः कमनीयकलाः स्वाभाविकरूपेण प्रतिबिम्बिताः। दृश्य काव्ये नाटके तु अखिलं ज्ञानं सर्वः शिल्पः, सर्वाः विद्याः समस्ताश्च कलाः साकारतां गताः।

यथोक्तं नाट्यशास्त्रे–

**न तज्ज्ञानं न तच्छिल्यं न सा विद्या न साकला।**
**ना सौ योगो न तत्कर्म नाट्येऽस्मिन् यन्नदृश्यते।।**
**इत्थं कलायाः पराकाष्ठा खलु काव्यम्।**
**श्रीभट्टतोतेन कविलक्षणं एवं निर्दिश्यते–**
**नानृषिः कविरित्युक्तम् ऋषिश्च किल दर्शनात्**
**विचित्रभावधर्मांश तत्त्वप्रख्या च दर्शनम्।।**
**स तत्त्वदर्शनादेव शास्त्रेषु प्रथितःकविः।**
**दर्शनाद् वर्णनाच्चाथ रूढा लोके कविश्रुतिः।।**
**तथाहि दर्शने स्वच्छे नित्येऽप्यादिकेवर्मुनेः।**
**नोदिता कविता लोके यावज्जाता न वर्णना।।**

कवित्वं हि केवलं वस्तु वर्णनेनैव न साफल्यं अश्नुते। कवेः कर्म गूढतरं क्लिष्टतरं च। कविः लोकस्य मार्गदर्शकः आचार्यः शिक्षकः नीतितत्त्वोपदेष्टा व्यवहारज्ञान शिक्षकश्च भवति। अतएव कवौ विविधविषमनिष्णातत्त्वस्य, अगाधज्ञानस्य, सहृदयत्वस्य, मनोवैज्ञानिकत्वस्य, अन्तर्दृष्टेश्च समन्वयोऽपेक्ष्यते। विविधविषयावगाहिज्ञानेनैव सः जीवनस्य सर्वा◌िणं विवेचनं विश्लेषणं च प्रस्तोतुं प्रभवति। सर्वा◌िणेन व्यापकेन च विवेचनेन कवेः कवित्वपदलाभः।

भामहेन काव्याल◌ेरे कवेः कर्म निर्दिशता प्रोक्तं यत् सर्वाः कलाः सर्वाः विद्याः काव्यस्या◌भूताः। तत्र बाह्यरूपस्य अल◌ारा दिरूपकलापक्षाश्रयणेन अन्तरात्मरूपस्य काव्यात्मतत्त्वस्य रसभावादि विवेचनेन संपुष्टिः संजायते अतः भामहमहोदयः कवेः महतः भारस्योल्लेखं कुर्वन्नाह–

**न सशब्दों न तद्वाच्यं न सा विद्या न सा कला।**
**जायते यन्न काव्या◌ अहो भारो महान् कवेः ।।**
**आ◌लभाषायाः शेलीमहोदयोऽपि कवेः वाणीं**
**स्तनयित्नुरूपेण विधानरूपेण च अ◌ीकरोति**

"Poets are not only authors of language and music but they are the institutors of lows and founders of civil society and inventors of art of life and the teachers who draw into a certain propin quity with the beautiful and the true. "

RRIJM 2015, All Rights Reserved 

कवेः कर्मकाव्यम्, इत्याश्रित्य नकेवलं वस्तुवर्णनेन, कथानकस्य पद्यात्मरूप प्रदानेन इति कर्तव्यता सिध्यति। तत्र किमापि मौलिकं तत्त्वं, मौलिकं दर्शनं, मौलिकं चिन्तनं वाऽपेक्ष्यते, तदैव काव्यगौरवम्। दर्शनाद् ऋते न ऋषित्वं न च कवित्वम्। दर्शन उक्तं च –नानृषिः कविरित्युक्तम् ऋषिश्च किल दर्शनात्। जीवनस्य तात्त्विकं विवेचनं, विश्लेषणं, गम्भीरं मनोवैज्ञानिकं च अध्ययनं काव्येऽनिवार्यम्। एतादृशगुण सम्पन्न एवं कविमूर्घन्यत्वं च भजते। कालरिजमोदयोऽपि प्रकृष्ट दार्शनिक दृष्टिमन्तरेण न कवित्वं स्वीकरोति।

यथोक्तं तेन– "No man was ever yet a great poet without being at the same time a profound philosopher"

कवेः भारती जगत्त्रयलोचनभूता, लोकोपकारिणी अतएव सा प्रशस्यते। सा घोरे निशीथे ज्ञान ज्योतिः ज्वलयति, अज्ञानान्धकारं ध्वसंयति, मनोव्यथाम् अपहरति, शोकानलं शमयति, दुःसन्तापं च दमयते अतः रससिद्वानां कवीनां यशः कांये जरामरणजं भयं न लक्ष्यते।

**जयन्ति ते सुकृतिनः रससिद्धाः कवीश्वराः**
**नास्ति येषां यशःकाये जरामरणजं भयम्।।**

कवित्वं न सुकरं कर्म। पूर्णपुण्यार्जित संस्कारवशात् प्रतिभासम्न्नत्वं तदैव कवित्वम् कवित्वे च शक्तिमत्वम् अतएव अग्निपुराणे

समर्थ्यते–

**नरत्वं दुर्लभं लोके विद्या तत्र सुदुर्लभा।**
**कवित्वं दुर्लभंतत्र शक्तिस्तत्र सुदुर्लभा।। (अग्निपुराण)**

एतस्मात् कारणात् साहित्यसङ्गीतकलाविहीनः साक्षात्पशुः कथ्यते

**साहित्यसङ्गीत कला विहीनः**
**साक्षात्पशुः पुच्छ विषाणहीनः**
**तृणं न खादन्नपि जीवमानस्य**
**तद्भागधेयं परमं पशूनाम्।।**

अपारे काव्यजगति कवि रेव प्रजापति सः यथा एव वस्तुतत्त्वं प्रस्तोतुम् ईहते तथा प्रस्तोतुम प्रभवति। आचार्यमम्मटेन काव्यपकाशस्य मङ्लाचरणे विधातुः सृष्टेः अपि कविसृष्टेः महत्त्वं प्रतिपाद्यते यत् कवेः भारती सर्वथा स्वतन्त्रा, आनन्दस्वरूपा विधिनियमैः अनिगडिता नवरसरूचिरा चास्ति।

नियतिकृतनियमरहितां ह्लादैकमयमनन्य परतन्त्राम्।

नवरसरूचिरां निर्मितिमादधती भारती कवेर्जयति विधातुः सृष्टिरियं नियतिनियमेषु बद्धो किन्तु न तथा कविकृतिः। ब्रह्मणः सृष्टिः सुखदुःख–मोहात्मिका किन्तुकविकृतिः सर्वथा आनन्दमयी काव्यमधीत्य केवलं आनन्दानुभूतिरेव जायते। जगदिदं कारणपरतन्त्रं किन्तु कविकर्म सर्वथा सर्वतन्त्रस्वतन्त्रम्। कव्येषु विभावनाद्यलङ्कारयोजनायां कारणं विनापि कार्यं वर्ण्यते। जगति षड्रसा एवं। तेऽपि कालान्तरे विकृतिं प्राप्नुवन्ति। किन्तु काव्ये नवरसास्ते च सर्वदा नवनवमेवास्वदं पुष्यन्ति। इत्थं सर्वथा विलक्षणा खलु कविता कविभारती वा। सा च सर्वोत्कर्षेण वर्तते।

सर्वप्रथमम् अग्निपुराणे प्रोच्यते अपोर काव्यसंसारे कविरे व् प्रजापतिः। यथावै रोचते विश्वं तथैतत् परिवर्तते। एतस्य अभिप्रायम् आदाय ध्वन्योलोके आनन्दवर्धनेनाप्युच्यते यत् कविः स्वच्छेया यत् वस्तु निधित्सति तथैव निदधाति। शृङ्गरि कविः सर्वं वर्णनं रसमयं विधत्ते नीरसश्च नीरसम्। सः चेतनम् अचेतवत् अचेतनं चेतनवच्च वर्णयितुं प्रभवति। कतुमकर्तुम् अन्यथाकर्तुं च यः प्रभावति स प्रभुः इति लक्षणोक्तदिशा कवेः प्रभुत्वे न संशयलेशोऽपि उक्तं च ध्वन्यालोके–

अपारे काव्यसंसारे कविरेकः प्रजापतिः।
यथास्मै रोचते विश्वं तथेदं परिवर्तते।।
शृङ्गरि चेत् कविः काव्ये जातं रसमयं जगत्।
स एव वीतरागश्चेन्नीरसं सर्वमेव तत्।।
भावानचेतनानपि चेतनवच्चेतनानचेतवत्
व्यवहारयति यथेष्टं सुकविः काव्ये स्वतन्त्रतया।।

कविः स्वतन्त्रः भवति। न केवलं चेतनाचेतनयो धर्मपरिवर्तने एव कविः प्रभवति अपितु सः मानवंदेवं देवं च दानवं कर्तुं क्षमते। वाल्मीकेः प्रभावणैव श्री रामचन्द्रो जगदवन्द्यः वभूव राणश्च दानवः। अतकवयो न कोपेनीयाः।

अतः कविर्मनीषी परिभूः इति सत्यमुक्तं यजुर्वेदे।।

RRIJM 2015, All Rights Reserved